**Series HMJ/C** **SET-4**

कोड नं. Code No. **22/C**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

| नोट | NOTE |
|---|---|
| (I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं । | (I) Please check that this question paper contains **15** printed pages. |
| (II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (II) Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (III) Please check that this question paper contains **18** questions. |
| (IV) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें । | (IV) Please write down the Serial Number of the question in the answer-book before attempting it. |
| (V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (Core)

*समयोः : होरात्रयम्* — *पूर्णाङ्काः : 80*
*निर्धारित समय : 3 घण्टे* — *अधिकतम अंक : 80*
*Time allowed : 3 hours* — *Maximum Marks : 80*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 10 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | 15 अङ्काः |
| SECTION B | (Sanskrit Writing Skills) | |
| खण्डः ग | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 20 अङ्काः |
| SECTION C | (Applied Grammar) | |
| खण्डः घ | भाग I – पठितांश – अवबोधनम् (पठितांश – अवबोधन) | 25 अङ्काः |
| SECTION D | PART I – Reading Comprehension | |
| | भाग II – सामान्यः संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य परिचय) | 10 अङ्काः |
| | PART II – General Introduction to Sanskrit Literature | |

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

**गद्यांशः**

अस्मिन् संसारे माता मातृभूमिः च सर्वोत्तमे । मातुः यादृशं नैसर्गिकं प्रेम स्वपुत्रे भवति न तादृशं क्वापि अन्यत्र । स्वपुत्रस्य कृते माता सर्वस्वम् अपि त्यक्तुं शक्नोति । एवमेव मानवः यत्र जन्म लभते सा तस्य जन्मभूमिः । स्वजन्मभूमिः सर्वदा आद्रियते । यतः तत्रैव बालस्य सर्वविधः विकासः प्रारभते । देशस्य उन्नत्यै देशभक्ति-भावनायाः महती आवश्यकता भवति । मातुः अङ्के यदा बालकः मूत्रपुरीषोत्सर्गं करोति, तदापि माता कुपिता न भवति । जन्मभूमेः अपि महत्त्वं तथैवास्ति । यस्यां भूमौ धूलिधूसरिताङ्गः मानवः शैशवे क्रीडति यस्याश्च अन्नजलाभ्यां सम्पुष्टः वर्धते, तां प्रति तस्य हृदये स्वाभाविकी प्रेमभावना भवति । यस्य हृदये स्वमातृभूमेः प्रेम नास्ति, तस्य जीवनं निरर्थकम् । उक्तं च – 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नचतुष्टयम्)
एक शब्द में उत्तर दीजिए । (केवल चार प्रश्न)
Answer in one word. (Only four questions) — *$\frac{1}{2}\times 4=2$*

(i) स्वपुत्रे कस्याः नैसर्गिकं प्रेम भवति ?
(ii) स्वपुत्रस्य कृते माता किं त्यक्तुं शक्नोति ?
(iii) का सर्वदा आद्रियते ?
(iv) भूमौ धूलिधूसरिताङ्गः मानवः कदा क्रीडति ?
(v) मातृसमं कस्याः महत्त्वम् अस्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) — *$2\times 2=4$*

(i) अस्मिन् संसारे के सर्वोत्तमे ?
(ii) देशस्य उन्नत्यै कस्याः महती आवश्यकता भवति ?
(iii) कस्य जीवनं निरर्थकम् अस्ति ?

(स) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. — *$1\times 1=1$*

(द) यथानिर्देशम् उत्तरत । (एकपदात्मकं उत्तरम्) (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए । (एक शब्द में) (केवल तीन प्रश्न)
Answer as directed. (Only one word) (Only three questions) — *$1\times 3=3$*

(i) 'ताम् प्रति तस्य हृदये स्वाभाविकी प्रेमभावना भवति' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ii) 'मानवः यत्र जन्म लभते' – इत्यस्मिन् वाक्ये 'लभते' क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(iii) 'धूलिधूसरिताङ्गः मानवः' इत्यनयोः पदयोः किं विशेषणपदम् ?

(iv) 'अवनत्यै' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मककार्यम्
## संस्कृत रचनात्मक कार्य
## Sanskrit Writing Skills

*15 अङ्काः*

**2.** भवतः नाम मुकुन्दः अस्ति । विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मुख्यातिथिपदं स्वीकृतार्थं शिक्षा निदेशक महोदयं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः उचितशब्दैः रिक्तस्थानानि पूरयत ।
आपका नाम मुकुन्द है । विद्यालय के वार्षिकोत्सव को लेकर 'मुख्यातिथि' के रूप में स्वीकृति के लिए शिक्षा निदेशक महोदय को लिखे पत्र में रिक्त स्थानों की पूर्ति मंजूषा में दिए गए उचित शब्दों से कीजिए ।
You are Mukund. In order to accept the post of Chief Guest for the school's annual festival, fill in the blanks in the letter written to the school inspector. Select appropriate words from the given box. $\frac{1}{2} \times 10 = 5$

सेवायाम्
(i) ________ ।
शिक्षा निदेशालयः
दिल्लीनगरम् ।
विषय : विद्यालयस्य वार्षिकोत्सवे मुख्यातिथिः भवितुम् ।

सविनयं (ii) __________ यद् (iii) __________ विद्यालयस्य (iv) __________ फरवरी मासस्य पञ्चमे दिनाङ्के (v) _________ भविष्यति । एतस्मिन् अवसरे विविधाः (vi) ____________ अपि आयोजिताः भविष्यन्ति । तस्योत्सवस्य मुख्यातिथिपदम् (vii) __________ भवान् विद्यालयपरिवारेण भूयोभूय: (viii) _________ । आशास्ति भवान् अस्मत्प्रार्थनां (ix) ________ अस्मान् अनुग्रहीष्यति ।

धन्यवादः ।

दिनाङ्कः _________

भवतां विनीतचरः
(x) ________
कक्षा द्वादश 'अ'
आदर्श लोकमान्य तिलक वरिष्ठ
मा. विद्यालयः, विकासनगरम्,
दिल्ली ।

**मञ्जूषा**

| |
|---|
| मुकुन्दः, वार्षिकोत्सवः, निवेद्यते, स्वीकृत्य, उपशिक्षानिदेशकमहोदय, प्रतियोगिताः, सम्पन्नः, अलङ्कर्तुम्, अस्माकम्, प्रार्थ्यते । |

**3.** मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुनः लिखिए ।
Fill in the blanks in the following short story with the help of the words given in the box below and rewrite the same. *$\frac{1}{2} \times 10=5$*

एकदा केचन शिष्याः (i) ________ कुर्वन्ति स्म । तदैव एकः (ii) ________ महता वेगेन आगच्छत् । गजस्य उपरि उपविष्टः हस्तिपकः (iii) ________ पुनः पुनः घोषयति स्म – 'अपसरन्तु अपसरन्तु' । सर्वे शिष्याः (iv) ________ । परम् एकः शिष्यः तत्रैव स्थितवान् । गजः तं (v) _______ गृहीत्वा दूरे क्षिप्तवान् । (vi) _______ तं गुरुः अपृच्छत् – वत्स ! त्वम् एवं किमर्थम् आचरः इति ? शिष्यः अवदत् – गुरूवर्य ! भवद्भिः एव शिक्षितं यत् (vii) _______ सर्वेषु अस्ति, अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति । गुरुः (viii) ________ "वत्स ! यथागजे ईश्वरः अस्ति तथा (ix) ________ अपि ईश्वरः" इति त्वया कथं न (x) ________ ।

**मञ्जूषा**

| |
|---|
| अवदत्, हस्तिपके, लब्धसंज्ञं, भिक्षाटनं, गजः, उच्चस्वरेण, धावितवन्तः, ईश्वरः, स्वशुण्ड्या, चिन्तितम् । |

**4.** **'योगस्य महत्त्वम्'** इति विषयमधिकृत्य **पञ्च**वाक्यमितम् संस्कृतेन अनुच्छेदं लिखत ।
(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् ग्रहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतंत्ररूपेण लेखितव्यम् )
**'योगस्य महत्त्वम्'** इस विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।
(यदि मञ्जूषा में दिए गए शब्दों की सहायता अपेक्षित हो तो उससे, अन्यथा स्वतंत्र रूप से स्वयं चिन्तन करके लिखिए )
Write a paragraph in **five** Sanskrit sentences on **'योगस्य महत्त्वम्'**.
(If required, take help of the words given in the box below, else write by thinking yourself) *1×5=5*

**मञ्जूषा**

| |
|---|
| शान्तिः, देहस्य, अनुभूतये, वयम्, प्राप्नुमः, मनुष्यः, आत्मिकं, कुर्वन्ति, समत्वं, प्रणायामादयः, शक्यन्ते, जनाः, कौशलम्, चित्तवृत्तिः, नीरोगः, स्वास्थ्यम्, चित्तवृत्तिनिरोधः, कर्मसु । |

**अथवा (OR)**

अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।

निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।

Translate any **five** of the following sentences into Sanskrit. *1×5=5*

(i) मोहन सदैव सत्य बोलता है ।

(ii) क्या मैं विद्यालय जाऊँ ?

(iii) जीवन का आधार शिक्षा ही होती है ।

(iv) मन्दिर के चारों ओर वृक्ष हैं ।

(v) मैं शीतल जल पीना चाहता हूँ ।

(vi) राम दशरथ के पुत्र थे ।

(vii) पुत्र को माता-पिता की सेवा करनी चाहिए ।

(i) Mohan always speaks the truth.

(ii) Should I go to school ?

(iii) Education is the basis of life.

(iv) There are trees all around the temple.

(v) I want to drink cold water.

(vi) Ram was the son of Dashratha.

(vii) The son should serve both the mother and the father.

## खण्डः ग (SECTION C)

## अनुप्रयुक्तव्याकरणम्

## अनुप्रयुक्त व्याकरण

## Applied Grammar

*20 अङ्काः*

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत । (केवलं प्रश्नषट्कम्)
निम्नलिखित वाक्यों में रेखांकित पदों की सन्धि और सन्धि-विच्छेद कीजिए । (केवल छह प्रश्न)
Join and disjoin Sandhis in the underlined words of the following sentences. (Only six questions) *1×6=6*

(i) <u>सत्यान्न</u> प्रमदितव्यम् ।

(ii) मुकुटाद्दीपकर्माणं <u>मणिम् + आदाय</u> भास्वरम् ।

(iii) <u>ईश्वरोऽहम्</u> अहं भोगी ।

(iv) <u>इति + उक्त्वा</u> महाबाहुः भूषणानि ददौ ।

(v) सन्यासिन् <u>बहूक्तम्</u> ।

(vi) मया भोजराजो रक्षित <u>एवास्ति</u> ।

(vii) <u>अष्टादशैव</u> श्रुत्यर्थस्मरणात्स्मृतयः ।

**6.** अधोलिखितवाक्येषु रेखाङ्कित-पदानां समासं विग्रहं वा कुरुत । (केवलं प्रश्नपञ्चकम्)
निम्नलिखित वाक्यों में रेखांकित पदों के समास और विग्रह कीजिए । (केवल पाँच प्रश्न)
Compound and expound the underlined words of the following sentences.
(Only five questions) *1×5=5*

(i) एतत् अनुशासनम् ।

(ii) धर्मस्य न कालः नास्ति ।

(iii) स एव बालभावः पार्थिवस्य एव ।

(iv) दीपस्य प्रकाशे कमप्यनवलोकयन् अवादीत् ।

(v) तस्यार्तस्य यथौषधम् ।

(vi) शोकेन संतप्तः मुञ्जः प्रायश्चित्ताय तत्परो जातः ।

(vii) यत्र सुशुकाः विलसन्ति ।

(viii) आकारेण सदृशा प्रज्ञा यस्य सः दिलीपः आसीत् ।

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ योजयत पृथक् वा कुरुत ।
(केवलं प्रश्नषटकम्)
निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़िए और पृथक् कीजिए । (केवल छह प्रश्न)
Add or separate suffixes from the underlined words of the following sentences. (Only six questions) *1×6=6*

(i) नीलेन पक्षनिवहो खम् आहसन्तः ।

(ii) तेन हि उदर्केण गुणेनात्र भवितव्यम् ।

(iii) राणाप्रतापबलवीर्य-विभासमाना स्वाधीन + तल् ।

(iv) तद् अपेक्षया रूपवताम् हि विद्या ।

(v) भोजः अपि चिरं प्रजाः पाल् + क्तवतु ।

(vi) स्वाधीनता आर्यभुवि मूर्तिमत् + ङीप् समाना ।

(vii) त्वं सज्ञानविज्ञानयोः प्रयोग कर्तुं शक्ष्यसि ।

**8.** कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत । (केवलं प्रश्नत्रयम्)
कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए । (केवल तीन प्रश्न)

Fill in the blanks using appropriate case-endings with the words given in the brackets. (Only three questions) *1×3=3*

(i) कश्चन कापालिकः _________ समागतः । (सभा)

(ii) अधुना _________ परिष्कृतपारदभस्म ददामि । (युष्मद्)

(iii) वैवस्वतः मनुः _________ माननीयः आसीत् । (मनीषिण्)

(iv) दिलीपः _________ सदृशागमः । (प्रज्ञा)

(v) भवन्तः _________ अधिकृत्य कथयन्तु । (नारीमर्यादा)

## खण्डः घ (SECTION D)

### भाग I

### (PART I)

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

*25 अङ्काः*

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following prose passage and answer the questions based on it in Sanskrit. *5*

**गद्यांशः**

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times 2=1$

(i) त्वम् किं वद ?

(ii) त्वम् कस्मात् मा प्रमदः ?

(iii) त्वया अनवद्यानि कानि सेवितव्यानि ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)

Answer in a complete sentence. (Only one question) *2×1=2*

(i) त्वम् (शिष्यः) किं कृत्वा प्रजातन्तुं मा व्यवच्छेत्सीः ?

(ii) त्वया शिक्षणे काभ्यां न प्रमदितव्यम् ?

(स) यथानिर्देशम् उत्तरत । (केवलं प्रश्नचतुष्टयम्)

निर्देशानुसार उत्तर दीजिए । (केवल चार प्रश्न)

Answer as directed. (Only four questions) $\frac{1}{2}\times 4=2$

(i) 'गुरवे' पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत ।

(ii) 'सत्यं वद' – अत्र क्रियापदं किम् ?

(iii) 'अप्रियं' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iv) 'ऐश्वर्याय' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

(v) 'प्रियं धनम्' अनयोः पदयोः विशेषणपदं किम् ?

**10.** अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित पद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following verse and answer the questions based on it in Sanskrit. *5*

**पद्यम्ः**

स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $\frac{1}{2}\times 2=1$

(i) केन एकान्तगुणं स्वायत्तम् ?

(ii) अपण्डितानां कृते मौनं किम् ?

(iii) अज्ञतायाः आवरणं किम् ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) *2×1=2*

(i) केषां समाजे मौनं शोभाकरम् अस्ति ?

(ii) विधात्रा किं विनिर्मितम् ?

(स) यथानिर्देशम् उत्तरत । (एकपदेन) (केवलं प्रश्नचतुष्टयम्)
निर्देशानुसार उत्तर दीजिए । (एक शब्द में) (केवल चार प्रश्न)
Answer as directed. (Only one word) (Only four questions) $\frac{1}{2}\times4=2$

(i) 'पण्डितानाम्' इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत ।

(ii) 'आवरणम्' इत्यस्य समानार्थकपदं श्लोकात् चित्वा लिखत ।

(iii) 'विभूषणं मौनम्' अत्र किं विशेषणपदम् ?

(iv) 'विनिर्मितं' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(v) 'विरचितम्' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following drama passage and answer the questions based on it in Sanskrit. *5*

**नाट्यांशः**

*ऋतध्वजः* – अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम् । आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ?
वामपार्श्वे रमणीनामालाप इव श्रूयते । अत्रैव स्थित्वा श्रोष्यामि ।

*कुण्डला* – सखि मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ।

*मदालसा* – ज्ञानोदधिस्तु अनन्तपारो गभीरश्च । मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि ।

*कुण्डला* – विनयशीले ! विद्या ददाति विनयम् अतएव एवं भणसि । कुलगुरु-तुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $\frac{1}{2} \times 2 = 1$

(i) राजोद्यानम् कस्यास्ति ?

(ii) का विद्याध्ययने रता ?

(iii) विद्या किं ददाति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)

Answer in complete sentence. (Only one question) $2 \times 1 = 2$

(i) किं दृष्ट्वा यूनो हृदयम् सहसा उत्कण्ठितं भविष्यति ?

(ii) कुण्डला मदालसाम् किम् अपृच्छत् ?

(स) यथानिर्देशम् उत्तरत । (एकपदेन) (केवलं प्रश्नचतुष्टयम्)

निर्देशानुसार उत्तर दीजिए । (एक शब्द में) (केवल चार प्रश्न)

Answer as directed. (Only one word) (Only four questions) $\frac{1}{2} \times 4 = 2$

(i) 'राजोद्यानम्' इत्यस्य किं विशेषणपदम् प्रयुक्तम् ?

(ii) 'श्रोष्यामि' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'त्वं तु केवलं विद्याध्ययने ... ।' इत्यत्र 'त्वम्' इति सर्वनामपदं कस्यै प्रयुक्तम् ?

(iv) 'स्त्रीणाम्' इत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत ।

(v) 'वृद्धस्य' इति पदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम् ?

**12.** अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत ।

निम्नलिखित पद्य के दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए ।

Complete the central idea of the given verse with the words given in the box below and rewrite the same. $\frac{1}{2} \times 6 = 3$

**श्लोकः**

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।

**भावार्थः**

राज्ञः दिलीपस्य अर्थानाम् सञ्चयनं (i) ____________ एव भवति । रघुवंशिनां कृते (ii) ____________ यथार्थकथनाय भवति । विजयेच्छुकानां रघुवंशिनां कृते युद्धं केवलं (iii) ____________ भवति न तु अन्यं पराभवाय । तेषां राज्ञां (iv) ____________ केवलं (v) ____________ एव भवति न तु (vi) ____________ । (एतदर्थं अहम् कालिदासः रघूणाम् अन्वयं वक्ष्ये)

**मञ्जूषा**

| |
|---|
| सीमितकथनम्, कामोपभोगाय, दानाय, कीर्तिवर्धनाय, दारपरिग्रहणम्, सन्तानाय । |

**अथवा (OR)**

प्रदत्ते-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत ।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ का चयन करके लिखिए ।

Pick out and write the correct one out of the three explanations given for each. *1×3=3*

(अ) शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा ।

(i) शरीरे यः जनः प्रहरति तस्य हृदयं नास्ति ।

(ii) शत्रुजनः शरीरोपरि प्रहारं करोति स्वजनः च मर्मस्थलं पीडयति ।

(iii) अरिः शरीरे हृदये च प्रहारं करोति ।

(ब) सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।

(i) वस्तुतः सर्वजनस्य सुनेत्रं शास्त्रज्ञानमेव, तदभावे तु स अन्ध एव ।

(ii) अन्धस्य लोचने न भवतः ।

(iii) यस्य लोचने भवतः स एव शास्त्रज्ञः, अन्धः नैव ।

(स) 'शब्दानामन्वाख्यानं व्याकरणम् ।'

(i) वाक्यानां संशोधनं व्याकरणम् ।

(ii) शब्दानां पदानां च सम्यक् विश्लेषणं व्याकरणम् ।

(iii) शब्दानां निर्माणम् व्याकरणम् ।

**13.** अधोलिखितस्य श्लोक**द्वयस्य** प्रदत्तान्वये उचितपदैः रिक्तस्थानपूर्तिं कुरुत ।

निम्नलिखित **दो** श्लोकों के दिए गए अन्वयों में उचित पदों से रिक्त स्थानों की पूर्ति कीजिए ।

The prose-order-renderings of the following **two** verses have been given below. Fill in the blanks. $\frac{1}{2} \times 6=3$

**पद्यम्**

(अ) इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।

**अन्वयः**

मया अद्य इदम् (i) ___________ इमम् मनोरथम् (ii) ____________, इदम् अस्ति, इदम् (iii) ___________ पुनः अपि मे भविष्यति ।

**पद्यम्**

(ब) पञ्चाशत्पञ्चवर्षाणि सप्तमासदिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ।।

**अन्वयः**

भोजराजेन (i) _____________ दक्षिणापथः पञ्चाशत् पञ्च (ii) _____________ सप्तमासदिनत्रयम् (iii) ___________ ।

**14.** 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत ।

'क' स्तम्भ के वाक्यांश का 'ख' स्तम्भ के वाक्यांश के साथ मिलान कीजिए ।

Match the sentences of Column 'क' with the sentences of Column 'ख'. $\frac{1}{2} \times 4=2$

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (अ) ज्ञाने मौनं | (i) मदन्तिके |
| (ब) अजीर्णे भेषजं वारि | (ii) जननी स्वतंत्रा |
| (स) अद्यापि यन्न विहिता | (iii) क्षमा शक्तौ |
| (द) एकदा समुपस्थास्यति | (iv) जीर्णे वारि बलप्रदम् |

**15.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत ।
(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुसार शुद्ध अर्थ चुनकर लिखिए ।
(केवल चार प्रश्न)

Select and write the appropriate meanings of the underlined words in the following sentences according to the context. (Only four questions) $\frac{1}{2} \times 4 = 2$

(अ) अलूक्षा धर्मकामाः स्युः ।

(i) कठोराः

(ii) कोमलस्वभावाः

(iii) तीक्ष्णाः

(ब) दिष्ट्या वर्धेथां युवाम् ।

(i) दृष्टिमात्रेण

(ii) सौभाग्येन

(iii) भक्त्या

(स) प्रजानामेव भूत्यर्थं स प्रजाभ्यो बलिम् अग्रहीत् ।

(i) करम्

(ii) अन्नम्

(iii) दानम्

(द) न शक्नोमि रोषं धारयितुम् ।

(i) प्रेम

(ii) क्रोधं

(iii) मोहं

(य) प्राची यदा हसति हे प्रिय ! मन्दमन्दम् ।

(i) सखी

(ii) देवी

(iii) पूर्वदिशा

## खण्डः घ (SECTION D)

## भाग II

## (PART II)

## सामान्यः संस्कृतसाहित्यपरिचयः

## सामान्य संस्कृत साहित्य परिचय

## General Introduction to Sanskrit Literature

*10 अङ्काः*

**16.** अधोलिखितेषु कस्यापि **एकस्य** कवेः परिचयं संस्कृतेन लिखत ।
निम्नलिखित में से किसी **एक** कवि का परिचय संस्कृत में लिखिए ।
Write a brief note on any **one** poet of the following in Sanskrit. *1×3=3*

(क) भासः (ख) पं. अम्बिकादत्त व्यासः (ग) वेदकुमारी घई

**अथवा (OR)**

मञ्जूषाप्रदत्तपदानां साहाय्येन अधोलिखितवाक्येषु रिक्तस्थानपूर्तिं कुरुत ।
मञ्जूषा में दिए गए पदों की सहायता से निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति कीजिए ।
Fill in the blanks in the following sentences, using the words from the box. $\frac{1}{2}\times 6=3$

(i) अश्वघोषः _________ महाकाव्यं अलिखत् ।
(ii) विदूषकः _________ नाटके नास्ति ।
(iii) बुधाः आचार्यचाणक्यमेव _________ कथयन्ति ।
(iv) भर्तृहरिः _________ लेखकः अस्ति ।
(v) हास्यरसः _________ मुख्यः रसः भवति ।
(vi) गद्यसाहित्ये 'हर्षचरितम्' _________ कथ्यते ।

**मञ्जूषा**

| |
|---|
| शतकत्रयस्य, बुद्धचरितम्, मुद्राराक्षसे, प्रहसनस्य, कौटिल्यम्, आख्यायिका । |

**17.** प्रकरण – प्रहसन – नाटकविधानां मुख्यविशेषताः लिखत ।
प्रकरण, प्रहसन और नाटक की मुख्य विशेषताएँ लिखिए ।
Write the main characteristics of प्रकरण, प्रहसन and नाटक. *1×3=3*

**18.** गीतिकाव्यस्य नीतिकाव्यस्य वा **चत्वारि** वैशिष्ट्यानि लिखत ।
गीतिकाव्य अथवा नीतिकाव्य की कोई **चार** विशेषताएँ लिखिए ।
Write any **four** characteristics of 'गीतिकाव्य' or 'नीतिकाव्य'. *1×4=4*